तत्र देवह्रदे स्नात्वा तर्पयित्वा पितॄन् सुरान् ।
संपूज्य हयशीर्षञ्च जगाम गजसाह्वयम् ॥”
इति वामनपुराणे ७१ अध्यायः ॥

हया, स्त्री, ( हयस्तद्गन्धोऽस्त्यस्या इति । अच् । टाप् । ) अश्वगन्धा । इति राजनिर्घण्टः ॥

हयाध्यक्षः, पुं, ( हयस्य अध्यक्षः । ) अश्वाध्यक्षः । तस्य लक्षणं यथा,—
“हयशिक्षाविधानज्ञस्तच्चिकित्सितपारगः ।
अश्वाध्यक्षो महीभर्त्तुः स्वासनश्च प्रशस्यते ॥”
इति मात्स्ये । २१५ । ३७ ॥

हयानन्दः, पुं, ( हयस्य आनन्दो यस्मात् । ) मुद्गः । इति राजनिर्घण्टः ॥ ( गुणादयोऽस्य मुद्गशब्दे ज्ञातव्याः ॥ )

हयायुर्वेदः, पुं, ( हयस्य आयुर्वेदः । घोटकचिकित्साशास्त्रविशेषः । तच्छास्त्रं हयशब्दे द्रष्टव्यम् ॥

हयारिः, पुं, ( हयस्य अरिः । ) करवीरः । इति रत्नमाला ॥

हयाशना, स्त्री, (हयानामशनं यस्याः ।) शल्लकीवृक्षः । इति शब्दचन्द्रिका ॥

हयी, स्त्री, ( हयस्य स्त्री । हय+ङीप् । ) घोटकी । इति जटाधरः ॥

हयेष्टः, पुं, ( हयानामिष्टः । ) यवः । इति राजनिर्घण्टः ॥

हयोत्तमः, पुं, ( हयेषु उत्तमः । कुलीनाश्वः । तत्पर्य्यायः । वाताश्वः २ जात्यः ३ आजानेयः ४ । इति त्रिकाण्डशेषः ॥

हरः, पुं, ( हरति पापानीति । हृ+अच् । ) शिवः । इत्यमरः । १ । १ । ३१ ॥ ( यथा, रघुः । ४ । ३२ ।
“स सेनां महतीं कर्षन् पूर्ब्बसागरगामिनीम् ।
बभौ हरजटाभ्रष्टां गङ्गामिव भगीरथः ॥” )
अग्निः । गर्द्दभः । इति केचित् ॥ हरणम् । इत्यङ्गशास्त्रम् ॥ त्रि, हरणकर्त्ता । ( यथा, भागवते । ३ । १८ । ११ ।
“एते वयं न्यासहरा रसौकसां
गतह्रियो गदया द्राविताः ते ॥” )

हरकः, पुं, ( हर एव । स्वार्थे कन् । ) शिवः । चौरः । इति केचित् ॥ हरणकर्त्तरि, त्रि ॥

हरगौरी, स्त्री, ( हरेण सह गौरी । ) अर्द्धनारीश्वरमूर्त्तिः । यथा,—
देव्युवाच ।
“यथा तवाहं सततं कायेनानुगता हर ।
भवेयं साहचर्य्येण तथा मां कर्त्तुमर्हसि ॥
मत्संयोगात्त्वेन संस्पर्शं नित्यालिङ्गनविभ्रमम् ।
प्राप्तुमिच्छामि भगवंस्त्वं चेत् कर्त्तुमर्हसि ॥
श्रीभगवानुवाच ।
देवि तवाप्यमपि यत्त्वमिच्छसि भाविनि ! ।
तत्रोपायमहं वक्ष्ये यदि शक्नोषि तत् कुरु ॥
अर्द्धं मम शरीरस्य त्वदंशात् त्वं मनोहरे ।
अर्द्धं भवतु मे नारी तथैवार्द्धं पुमानिति ॥
यदि त्वं न हि शक्नोषि हर्त्तुं तत्त्वद्भमीप्सितम् ।
तदाहं ते हरिष्यामि शरीरार्द्धं वरानने ! ॥
तवैवार्द्धं तथा नारी अर्द्धं भवतु पूरुषः ।
विद्यते तत्र शक्तिश्चेत् त्वमनुज्ञातुमर्हसि ॥
श्रीदेव्युवाच ।
“तवैवाहं हारयामि शरीरार्द्धं वृषध्वज ! ।
किन्त्वहं त्वेकमिच्छामि यच्चेत्त्वं हर इच्छसि ॥
तथाहमर्द्धं भवतो हृत्वा तिष्ठामि तावता ।
त्यजाम्यहं यदा तेऽर्द्धं सम्पूर्णं स्यात्तदा द्वयम् ॥
इत्यर्द्धभागहरणं भवेद्यदि यथेप्सितम् ।
तदैवाहं तदा शम्भोः शरीरार्द्धं हराम्यहम् ॥”
ईश्वर उवाच ।
एवमस्तु भवेन्नित्यं यथा त्वं कर्त्तुमिच्छसि ।
शरीरार्द्धस्य हरणं भूयात्तत्र यथेप्सितम् ॥
श्रीऔर्व्व उवाच ।
अथ गौरी तदा पूर्ब्बमनुभूतं तपःस्थितौ ।
योगनिद्रास्वरूपं तदात्मानोऽचिन्तयद्धिया ॥
हरं प्रणम्य प्रथमं ब्रह्माणञ्च ततः परम् ।
ततस्त्रिजगतामीशं हरिं नारायणं प्रभुम् ॥
चिन्तयित्वा तथा तेषामेकतां सा जगन्मयी ।
आत्मानं योगनिद्राञ्च चिन्तयित्वा मनस्विनी ॥
दक्षिणे स्वशरीरस्य भागार्द्धं शशभृद्भृतः ।
शरीरस्य तथा वाममतिप्रेम्णा निजं हरेः ॥
हरोऽपि स्वशरीरार्द्धं गौरीकाये तदा स्वयम् ।
प्रेम्णाभिनिवेशयत्तस्याश्चिकीर्षुः प्रियमद्भुतम् ॥
अथ स्थित्वा तदा भर्गः कान्त्या सह चिरं तदा ।
परित्यज्य शरीरार्द्धं पृथगेव बभौ रुचा ॥
कालो भूत्वा स्वर्णगौरी शरीरार्द्धन्तु शाङ्करम् ।
प्राप्य मोदात्तदात्मानं सन्तुष्टा च जगन्मयी ॥
एवं यदा शरीरार्द्धमादाय परमेश्वरी ।
हरस्य तिष्ठति तदा राजतेऽतीवशोभना ।
अर्द्धं धम्मिल्लसंयुक्तं जटाजूटार्द्धयोजितम् ।
एकस्मिन् श्रवणे भोगी भोगी जाम्बूनदाचितम् ।
कुण्डलं श्रवणेऽन्यस्मिन् शीर्षे तस्या व्यराजत ॥
अर्द्धं मृगाक्षि चास्यार्द्धं वृषभाक्षि व्यराजत ।
अर्द्धं स्थूलनसं चारु तिलपुष्पनसं परम् ॥
दीर्घश्मश्रु तथैवार्द्धमर्द्धं श्मश्रुविवर्ज्जितम् ।
आरक्तचारुदशनं रक्तौष्ठमेकतस्तथा ॥
अपरं शुक्लविपुलदीर्घाकृति रदं परम् ।
अर्द्धं नीलगलञ्चार्द्धमपरं हारसंयुतम् ॥
अर्द्धं कङ्कणकेयूरयुक्तबाहु तथापरम् ।
नागकेयूरसंयुक्तस्थूलबाहु निरूर्म्मिकम् ॥
अर्द्धं विशालतभुजं करिहस्तभुजं परम् ।
एकत्र सोर्म्मिकाः शाखाः करस्यान्यत्र तां विना ॥
एकस्तनन्तु हृदयं रोमावल्यर्द्धसंयुतम् ।
रम्भास्तम्भमानोरु सुपार्ष्णि मृदुपादकम् ॥
एकं तथापरं स्थूलसंहतोरु पदाम्बुजम् ।
एकञ्चारु मृदु स्थूलजघनं सुमनोहरम् ॥
तथापरं दृढकटि संहतोर्द्धपदाम्बुजम् ।
एकं वैयाघ्रचर्म्मापियुक्तं भूतिविलेपनम् ॥
अपरं मृदुकौषेयवसनं चन्दनोचितम् ।
एवमर्द्धं तथा जातं योषिल्लक्षणसंयुतम् ॥
अपरं बलवद्भूरि सुदृढं पुरुषाकृति ।
एवमर्द्धं स्मरिपोर्ज्जहार गिरिजा सती ॥
हिताय सर्व्वजगतां कामाख्या कालिकोपमा ।
तस्याः शरीरं राजेन्द्र हरतन्वर्द्धसंयुतम् ।
येनोपमेयं तन्नास्ति मार्गितं भुवनत्रये ॥
सन्तानः पारिजातो वा एकान्तविषदस्तकः ।
अमोघया तथा वन्ध्यौ तौ चापि ययतुर्नहि ॥
बहुधा च पृथक्त्वेन तौ रेमाते नरेश्वर ।
अर्द्धनारीश्वरो भूत्वा स तु रेमे कदाचन ॥
इति यद्यपि भूतेशः स्वयं शक्नोति कालिकाम् ।
गौरीं कर्त्तुं तदा सर्व्वभूतकारणकारणः ॥
तथापि तां गिरिसुतां संयोज्य विविधैः पुरा ।
तपस्ययोजयद्देव क्रियोपायैरनेकशः ॥
तपोनिर्धूतसर्व्वाङ्गीं पश्चाद्गौरीमथाकरोत् ।
अर्द्धञ्च प्रददौ तस्यै शरीरस्य महेश्वरः ॥
नैवास्य तत्त्वं जानन्ति शक्राद्याः सकलाः सुराः ।
शरीरार्द्धप्रदानस्य तपसो योजनस्य च ॥
एतस्य तत्त्वं जानन्ति महात्मानो महाबलाः ।
नन्दी भृङ्गी महाकालो वेतालो भैरवस्तथा ।
अङ्गभूता महेशस्य वीतभीतास्तपोधनाः ॥
ये मानुषशरीरेण प्राविशं तपसो बलात् ।
गणानामाधिपत्यन्तु ते जानन्ति हरं परम् ॥
एवं सदा त्वया योज्याः सानुगा नृपसत्तम ! ।
वनिताः सत्क्रियोपायैस्ततो भद्रमवाप्स्यसि ॥
य इदं शृणुयान्नित्यमद्भुतं पुण्यदायकम् ।
शिवयोः प्रीतिकरणं शरीरार्द्धं ग्रहं तथा ॥
गौरीत्वापादनञ्चैव कालिकायाः शुभावहम् ।
न तस्य विघ्ना जायन्ते स च पुण्यतमो मतः ।
दीर्घायुः स सुखी भूयात् पुत्त्रपौत्त्रसमन्वितः ॥
सततं परिशृण्वानः शिवयोश्चरितं महत् ।
शिवलोकमवाप्नोति सुचिरं शिवसन्निभः ॥”
इति श्रीकालिकापुराणे ४४ अध्यायः ।

हरचूड़ामणिः, पुं, ( हरस्य चूड़ामणिः शिरोभूषणमिव ।) चन्द्रः । इति भूरिप्रयोगः ॥ शिवशिरोरत्नञ्च ॥

हरणं, क्ली, ( ह्रियते इति । हृ+ल्युट् । ) यौतकादिदेयद्रव्यम् । ( यथा, रघुः । ७ । ३२ ।
“सत्त्वानुरूपाहरणीकृतश्रीः
प्रास्थापयत् राघवमन्वगाच्च ॥” )
तत्पर्य्यायः । दायः २ । इत्यमरः । २ । ८ । २८ ॥ यौतकं आदिना उपनयनभिक्षाप्रसादादि च यत् देयं तत् दायहरणपदवाच्यं कन्यादानकाले जामात्रादिभ्यो व्रतभिक्षादौ ब्रह्मणादिभ्यश्च यत् द्रव्यं दीयते तत्र दायादिद्वयमित्यर्थः । युतकं योनिसम्बन्धः तत्र भवमिति ष्णे यौतकं युतयोर्वधूवरयोरिदमिति वा कणि यौतकं यौतुकमुकारमध्यमपि । यौतकं यौतुकञ्च तत् इति वाचस्पतिः । दीयते दायः, कर्म्मणि घञ् सुष्ठु दीयते सुदायः इति पाठः इत्यन्ये । ह्रियते हरणं कर्म्मणि अनट् । इति भरतः ॥ * ॥